Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४३२८

Title मीमांसावार्त्तिक १मा अध्याय ३य पादः

Author कुमारिल स्वामी

Extent १८[illegible] Age

Subject मीमांसा

मीमांसावार्त्तिक प्रथमाध्याय तृतीयपाद:

५७१७

४२९८
४६५ कां
कुमारिल स्वामी

मीमांसावार्तिके प्रथमाध्यायस्य तृतीयः पादः



श्रीः धर्मस्यशास्त्रमूलत्वादशास्त्रमनपेक्षंस्यात् कथंलक्षणोधर्मइत्येतदिहलक्षणार्थइत्युक्तंतत्रप्रथमेपादेचोद
नाप्रामाण्यंसिद्धं द्वितीयेत्वर्थवादादेरेवंकृत्स्नस्यवेदस्यप्रामाण्यमुक्तंइदानींपौरुषेयीषुस्मृतिष्वाचारेषुचवैदिकप
रिगृहीतेषुचिंतायद्यपिचोदनाप्रामाण्यमप्रामाण्येपिस्मृतीनांनविहन्यतेतथापिकिंलक्षणोधर्मइतिजिज्ञासाधिकारा
त्स्मृतिप्रामाण्यंलक्षणेसंगतं नचप्रामाण्येस्मृतीनांवेदस्यापितत्सापेक्षत्वादप्रामाण्यंस्यात् यांजनाःप्रतिनंदंतीत्ये
वंमंत्रोरात्रिदेवत्यकर्मांगत्वेनप्रतीयतेस्मार्तेचकर्मणिरात्रिर्देवतेतितदपेक्षस्यमंत्रस्यतदप्रामाण्यादप्रामाण्यंनतत्सा
मान्यादितरेषुतथात्वमितिस्यात्किलवेदस्याप्रामाण्यंतेनवेदेप्रामाण्यसिध्यर्थंस्मृतिप्रामाण्यमितिसंगतिः नैनदेवंयदा
हिस्मृतेरप्रामाण्यंतदामंत्रस्यस्मार्तकर्मांगत्वेकिंप्रमाणंनतावत्लिंगंतस्यसामान्यसंबंधप्रमाणसापेक्षत्वान्ना

पिस्मृतिवाक्यंतस्याप्रामाण्यात् यद्यपिच लिंगमात्रंविनियोजकं तथापिफलवदंगत्वेनाफलस्य विनियोगात्स्मृत्य
प्रामाण्येवस्मार्त्तस्य कर्मणःफलवत्वाभावान्नतादर्थ्यं मंत्रस्ययेनसापेक्षतास्यासत्यपिचमंत्राप्रामाण्येसकलस्या
प्रामाण्यं कुतस्त्यन् हिमंत्रस्यस्वारसिकमप्रामाण्यंयेनत्राह्मात्रेस्यात् अपितुसापेक्षैकवाक्यताकृतंनचकृत्स्नस्य
तदस्तीतिकथमप्रमाण्यंनस्मान्नैवंसंगतिरितिपूर्वोक्तैवज्यायसीधर्मप्रमाणचिंताधिकारात्स्मृतीनामपिप्रामाण्यं
प्रतिपाद्यतइतिनचैवंचोदनैवेतिप्रतिज्ञाव्याघ्नियःतन्मूलत्वेनतदंतर्भावेनचेतरेषांप्रामाण्यात्स्वातंत्र्येणप्रामाण्याभावा
त् तदिह किंस्मृत्याचाराणां धर्मेप्रामाण्यमुतनेतिविचार्यतेतदर्थंचश्रुतिमूलत्वमेषांभ्रांत्यादिमूलत्वंचेतिविचारयि
तव्यं तत्रप्रायेणानृतवादित्वात्पुंसांभ्रांत्यादिसंभवात् चोदनानुपलब्धेश्चश्रद्धाभावात्प्रमाणता १ संभवेद्धिप्रलंभेषु

पुरुषेषु न तावन्निर्विचिकित्समेव प्रामाण्यं स्वाध्यवसानं अतश्चाननुष्ठानात्फलतोऽप्रामाण्यमेव किंच नैषां प्रत्यक्षा
दिमूलत्वेन प्रामाण्यं तेषां धर्माधर्मयोरप्रवृत्तेः न स्वातन्त्र्येण वेदवत्पौरुषेयत्वात् न चोदनामूलत्वेन तदनुपलम्भात्
न खल्वनुपलभ्यमानाश्चोदनाः स्वप्रमेयं प्रतिपादयन्ति न चासां प्रत्यक्षेणोपलम्भः संभवो नुच्चार्यमाणत्वात् उच्चार्यमाणत्वे
वा स्मृतिप्रणयनवैयर्थ्यं प्राक्पठिता अपि संप्रति पुरुषक्रियादुत्सन्ना इति चेत् विकल्पासहत्वात् यो ह्युत्सादं चो
दनानां वदति स वक्तव्यः किमेकाकाचिच्छाखा स्मार्तश्रुतिसंघातात्मिका पूर्वमासीत्सेदानीमध्येतृक्रियादुत्पन्नेति कल्प्य
ते किं वा बह्वीषु शाखास्वितस्ततः श्रुतयः स्मृतिमूलाः पठिताः संप्रत्युच्छिन्ना इति तेन सहस्रसामशाखा एकशतमध्व
र्युशाखाः एकविंशतिशाखं बह्वृचमित्यादि शाखापरिमाणस्य परंपरया सर्वलोकस्मरणान्नातोऽधिकाशाखासंभाव

यितुंशक्यतेनापिपठ्यमानानांअत्यंतावहिताध्येतृकाणांमध्येकासांचित्चोदनानामुत्सादसंभवःनचसंप्रत्यपि
पठ्यंतएवविप्रकीर्णसुत्रणासास्मृतिमूलाःश्रुतियुक्तंस्मृतिप्रणयनानुपपत्तेरित्युक्तंतत्नतावदिदानीमतीतकाले
वापठिताःश्रुतयःस्मृतीनांमूलंःनापिनित्यानुमेयत्वंअंधपरंपराप्रसंगात्याहिचोदनानकथंचिदुच्चार्यतेतस्याः
सर्वपुरुषप्रत्यक्षप्रसंगान्नावातद्वुलनतरमस्तित्वःननुस्मृतिलिंगवशेनानुमानंप्रसरत्येषसर्वेषांलिंगादिक
ल्प्यास्विवश्रुतिषुविषमउपन्यासःलिंगादयोहिनित्याःसर्वपुरुषप्रत्यक्षविषयाश्रुतिमंतरेणानुपपद्यमानायु
क्तंयत्तस्यांनिश्चयमादधतिस्मृतिवाक्यरचनात्तुपौरुषायीयदर्थविषयोपलभ्यंतेतद्विषमेयमेवरचयितुर्ज्ञानं
कल्पयतित्वष्टकाकर्त्तव्यताविषयकंचस्मृतिवाक्यमितिनूनमयमष्टकाकर्त्तव्यतांवेदेत्येतावत्त्वप्रथमंकल्प्य

तेनश्रुतिस्वरूपंनापिश्रुतिज्ञानंएवमर्थज्ञानेस्मृतिकारस्यकल्पितेपश्चात्तज्ज्ञानलिंगात्तद्वेयन्नूतार्थोनुमानंच
3 श्रुतिकल्पनंएवंस्मृत्यंतरकारस्यापिस्मृत्यंतरलिंगादर्थएवानुमानमितिनिःप्रामाणिकाश्रुतिविकल्पना
स्यात् अथोच्येतनखलुपरकीयेणज्ञानेनरूढित्येवार्थनिर्णयोमूलानुसंधानसापेक्षत्वात् तत्रयदिस्मृति
कारस्यार्थविषयकज्ञानमूलमनुसंदधानःस्मृत्यंतरमेवसंभावयेत्तदपिचज्ञानस्यैवलिंगंनार्थस्येवंतत्पू
र्वतरमपिस्मरणज्ञानस्यैवलिंगनार्थस्येतिनक्वचिदर्थनिश्चयोलैंगिकोलभ्यतइतिश्रुतिरेवकल्प्यइत
व्यायद्येवंश्रुतावपितुल्यमेवैतत्स्मृतिकारस्यमूलतयाश्रुतिज्ञानमेवप्रथमंकल्प्यतेनश्रुतिसद्भावःश्रु
तिविषयेणतुज्ञानेनरूढ्यभूतश्रुतिविनिर्णयःपरज्ञानेनचतद्विषयश्रुतिनिश्चयोमूलानुसंधानसापे

क्तेः मूलंचस्मृतिकारस्यस्मृत्यंतरमेवतदपिचार्थज्ञानद्वारेणश्रुतिज्ञानस्यैवलिंगंनश्रुतिसद्भावस्येतिनकचित्कस्य
चिदपिश्रुतिसद्भावनिश्चयोलैंगिकोलभ्यतेलिंगादीनितुश्रुतिसद्भावकल्पयंतीत्युक्तोविशेषःतेनयदिपरकीयेणज्ञा
नेनप्रागेवार्थनिश्चयस्ततोर्थस्मरणपरंपरयार्थस्यैचानुमानान्नश्रुतिसिद्धिरथस्मृत्यंतरमेवमूलंस्यात् अथपरंपर
याचरूपनिश्चयस्तदास्यात् चैत्यवंदनादीनामपिपुंवाक्यपरंपरयाधर्मोनुमानंस्यात् अथमूलानुसंधानापेक्षंततोयथै
ववयमानवीयात्सारणान्मनोरर्थविषयश्रुतिविषयंचज्ञानमात्रेकल्पयित्वाश्रुतिसद्भावमनिश्चित्यतन्निश्चयायम
नोःश्रुतिसद्भावमूलंप्रमाणमिगयामहेतथामनुरप्यन्यस्यसोप्यन्यैस्येतिनश्रुतिसद्भावसिद्धिःएवंउनयथापिश्रुतिर्नि
त्यानुमेयानसिध्यतीतिनतन्मूलत्वेनप्रामाण्यंस्मृतीनामतःश्रद्धामात्रविजृंभितंस्मृतिप्रामाण्यमितिप्राप्तेनिधीयते वै

दिकैःस्मर्यमाणत्वात्परिग्रहदार्ढ्यंततःसंभाव्यवेदमूलत्वात्स्मृतीनांवेदमूलता १ एवंहिवेदस्यैवधर्ममूलतानान्यस्येत्या

स्थितामन्वादयस्तेषामष्टकादिषुधर्मत्वस्मरणेनकथंचिदुपपद्यतेनयदिवेदमूलतातथावैदिकानामेवाविगीतप

५ रंपरयापरिग्रहोवैदिदिवैदिकत्वस्मरणंचैषुत्रिशिष्टानांनासतिवेदमूलत्वेकल्पतेसंभवतिचत्रैवर्णिकानांवेदसंयोगदृ

तितन्मूलत्वमेवाध्यवसायतेकथमनुच्चारितानांमूलत्वोपपत्तिरितिचेत्नउच्चार्येतएवंस्मृतिमूलाःश्रुतयःसंप्रत्यपि

विप्रकीर्णःकाश्चित्कचित्कस्यांचिच्छाखायांविप्रकीर्णत्वात्शाखांतराध्यायिभिःशाखांतरगतानामनुपलंभात्तद

र्थेनार्थवन्निबंधनंउपलंभेपिवामंदाधीभिरनुपसंहरणीयानामुपसंहारफलंस्मृतिप्रणयनमितिनवैयर्थ्यमतःस्मृत

यःप्रमाणमितिसिद्धं विरोधेत्वनपेक्षंस्यादसतिह्यनुमानं उत्सृष्टस्यस्मृतिप्रामाण्यस्यापवादःक्रियतेऽत्रप्रत्यक्षश्रु

त्यक्षश्रुतिविरुद्धाः स्मृतीरुदाहृत्य चिंत्यते किं प्रमाणमप्रमाणं वेति तदर्थं च पूर्ववदेव श्रुतिमूलत्वं भ्रांत्यादिमूलत्वं वेति चिं
तनीयं तत्र पूर्वाधिकरणं समस्तमिह पूर्वः पक्षः न च प्रत्यक्षश्रुतिविरोधात् स्मार्तश्रुतिकल्पनानवकाशः द्वयसंभवात् व्रीह्या
दिश्रुतिवत् यत्र हि द्वयोरसंभवस्तत्रैकविषयेण प्रत्यक्षेणेतरविषयमनुमानं प्रमेयापहारान्निराक्रियते वक्षाविवक्षेत्यानुमा
नं यत्र तु द्वयसंभवस्तत्र व्रीहिग्रहमपीतरन्नेतरस्य विषयमपहरतीति तद्विषयमनुमानं न शक्नोति प्रतिषेद्धुं संभवति च युग
पदनुपसंहरणीयार्थमपि श्रुतिद्वयं व्रीहियववद्बृहद्रथंतरग्रहणाग्रहणादिश्रुतिवदपि प्रत्यक्षेणापि स्मार्तो विधिनास
द्दृष्टेन विधिना श्रुत्यनुमानं न शक्यं निराकर्तुं कथं तर्हि श्रुतिलिंगादिषु पूर्वपूर्वेणोत्तरोत्तरस्य बाधस्तत्रापि श्रुतिद्वयसंभ
वात् न शक्यतया कल्प्या निराकर्तुं शक्यते उच्यते नैव तत्र प्रमेयापहारनिबंधनो बाधः किंतु कल्पनामूलोच्छेदात्

यावद्धिमंत्राम्नानमनवगतप्रयोजनं·प्रकरणीचाकृतार्थः तावदेवतत्सिध्यर्थंश्रुतिकल्पनंप्रमाणवत् यदानुक्तेनयाश्रु
त्याद्वयोर्नैराकांक्ष्यंतदामूलोच्छेदादाकांक्षाधीनाश्रुतिकल्पनानैवोनैवोन्मज्जति अत्रतुप्रत्यक्षयाश्रुत्यानस्मृतेर्मू
लाकांक्षानिवर्तयते यतोमूलोच्छेदादनुमानविरोधःस्यात् यदिपरंप्रमेयापहारादग्नाविवव्रीत्यानुमानंप्रत्यक्षेण
5
विरुध्येत नचैवंसंभवति श्रुतिद्वयसंभवात् अग्नेर्हिम्नौत्योर्हिनसंभवतः परस्परोपमर्द्दंकृत्वा तयोरतः प्रत्य
क्षेणैवौष्ण्यनशैत्यस्यापहृतत्वान्न तद्विषयमनुमानमुत्सहते उदेतुं अत्रतुसंभवति श्रुतिद्वयंव्रीहियववदित्यु
क्तं अथवा श्रुतिस्मृतिप्रमेयेनमिथोविरुद्धेन हिव्रीहिशक्त्यायवशक्तिर्विरुध्यते सावातयास्वशक्त्यावा
वेष्टनशक्तिः सावातयाशक्तिमात्रंचविधेःप्रमेयमतोवानुमानस्यप्रत्यक्षेणविरोधाद्विरुद्धानामपिप्रामाण्य

मिति प्राप्ते निधीयते अप्रामाण्यविरुद्धानां मन्त्रवाक्यार्थविधातः श्रोटुं रीन शक्नोति सर्वो वेष्टयितुं स्पृशन् १ वेष्टितां वापि सं
स्प्रष्टुमतोन्योन्यविरोधः प्रमेयापक्षे तैरेव बाधः स्यात् वह्निशैत्यवत् २ अत्र वाक्यार्थविषयता हि मूढो निषिक्तम प्रामाण्य
कारणं विधीनां सागरं तरेदित्यादिवद् वाक्यं संस्पृशन्तावेष्टयितुं वेष्टयित्वा संस्प्रष्टुं वा अतो वेष्टयेत् स्पृशेदित्यत्र वा
क्यार्थविधानान्न तावदुभयोरपि प्रामाण्यं संभवतीत्यवश्यं अन्यतरद्बाधितव्यं ननु शक्तिमात्रं विधेः प्रमेयं संभ
वति चाननुष्ठीयमानयोरपि शक्तिरिति सत्यप्यनुष्ठानविरोधे प्रमेयभूतशक्यविरोधादुभयोः प्रामाण्यमुपपन्नमि
ति नैकस्यापि बाधो युज्येत किमिदानीं सागरं तरेदग्निना सिंचेदित्यादेरपि उपपन्नं प्रामाण्यं अननुष्ठीयमानस्यापि
शक्तिसंभवात् तथा सामान्यविशेषशास्त्रयोरपि न विरोधः स्यात् आहवनीयपदयोरुभयोरपि शक्तिसंभवादाहवनी

यस्यनपदेनबाधःस्यात्अविरुद्धस्यदुर्बलस्यापिबाधायोगात्नचात्रश्रुत्यादिभिरिवलिंगादीनांमूलोच्छेदेनश्रुतिकल्पनानिरो
धनाद्बाधसंभवःसामान्यशास्त्रस्यापिप्रत्यक्षत्वात्तन्मात्रेणचहोमीतरेष्विवयदहोमिथ्याहवनीयसिद्धेःअतोत्रसामग्रीनि
रोधासंभवात्प्रमेयविरोधादेवबाधोंगीकर्तव्यःशक्तिमात्रेप्रमेयेचविरोधाभावान्नबाधःसिद्ध्येतएवमुत्पत्तिशिष्टोत्पन्न
शिष्टनित्यनैमित्तिकादिषुप्रसंगोदर्शयितव्यःतस्मादवश्यमनुष्ठानविरोधेशास्त्रविरोधोंगीकार्यःकिंचनशक्तिमात्रंभू
तार्थकथनवद्विधिनाबोध्यतेप्रवर्तनारूपोहिविधिरर्थात्समीहितसाधनताशक्तिंबोधयतिप्रवर्तनाचाशक्यविषयानसं
भवतीतिस्यादेवाप्रामाण्यंयदातुसमीहितसाधनतैवविध्यर्थइत्याश्रीयतेतदापिनतन्मात्रंविधिःकिंतुकर्तुःसमीहितसा
धनतानचसाऽशक्येर्थेसंभवतीत्यप्रामाण्यंयथोक्तौआख्यातानामर्थंयुवतांशक्तिंसहकारिणीतितेनाशक्यानुष्ठान

मर्थद्वयं बोधयतोः प्रमाणयोः प्रमेयविरोधादवश्यमन्यतरद्बाधितव्यं तत्र प्रत्यक्षेणानुमानस्य बाधोग्नाविवक्षेत्यानुमान
स्येति सिद्धमप्रामाण्यं स्मृतीनां श्रुतिविरुद्धानां व्रीह्यादिषु तु द्वयोरपि प्रत्यक्षत्वेनागृह्यमाणविशेषत्वात् नैकेनेतरस्य
बाधः विरुद्धार्थत्वाच्च न द्वयोराजस्येन प्रामाण्यं न चाप्रामाण्यमविद्यमानदोषयोः संभवतीत्यनन्यगत्योभयोरपि पाक्षि
को बाधः कल्प्यते न चैवं शास्त्रस्याप्रामाण्यं यथा सामान्यशास्त्रस्य विशेषशास्त्रबाधितस्यापि नाप्रामाण्यं तद्वदिहापि
ननु बाधितं भवत्यप्रमाणं च न भवतीति व्याहतमेतत् सत्यमेतत् नह्यत्र पारमार्थिकः शास्त्रार्थो बाध्यते येनाप्रामाण्यं शा
स्त्रस्य स्यात् किंच प्रतिपक्षमनालोचयतो यः शास्त्रस्य स्वरसतः सार्वत्रिकः प्रत्ययो जायते सोऽत्र बाध्यते तद्बाधाच्च पाक्षि
कानुष्ठानपरत्वं शास्त्रस्याध्यवसीयते सामान्यशास्त्रस्येव विशेषशास्त्रानाक्रांतविषयपरत्वमिति नाप्रामाण्यं न

चैवं स्मृतिवशेन श्रुतिस्वरूपभंगेन स्पर्शनस्य पाक्षिकत्वं कल्पयितुं शक्यते स्मृतेः स्वतोऽप्रमाणत्वेन श्रुतिबाधासाम॰
र्थ्यात् श्रुतिकल्पनस्य प्रत्यक्षश्रुतिविहितस्पर्शविरोधेन निरुद्धत्वात् ननु पाक्षिकत्वेनापि प्रत्यक्षश्रुतिरुपपद्यते तस्
स्मिन्पक्षे नास्ति सा तत्र स्पर्शाभावेन वेष्टनस्य शक्यानुष्ठानत्वात् तद्विषयश्रुतिकल्पनमुपपन्नमिति चेन्नेतरेतराश्रया
त्स्वरतो हि श्रुतिवाक्यादपाक्षिकं स्पर्शनं गम्यते तस्मिंश्चापाक्षिके न स्मार्तश्रुतिकल्पनमशक्यत्वात् न हि स्म
शतावेष्टयितुं शक्यते तत्र स्पर्शनस्य पाक्षिकत्वे सति शक्यार्थतामासाद्य काल्पनिकी श्रुतिरात्मानं लभते तस्यां
च लब्धात्मिकायां तद्विरोधात्स्पर्शनस्य पाक्षिकत्वमितीतरेतराश्रयः स्यात् अतोत्र श्रुत्यसंभवात् भ्वांत्यादिमू
लत्वादप्रमाणमेवंजातीयकं स्मरणं न ह्यसंभवत् भ्वांत्यादिकं स्मरणं कस्यचिदपि शक्यमध्यवसातुं संभाव्यमा

नेतु न्वांत्यादौ दृष्टानुगुणादृष्टकल्पनाऽसति विरोधे कर्तृसामाद्वैदिकपरिग्रहदार्ढ्याच्च श्रुत्यनुमानमिति न सर्वत्रैकरूप्य
मिति हेतुदर्शनाच्च अधिकरणांतरं वा अत्र च गृह्यमाणकारणं श्रुत्यविरुद्धं स्मरणमुदाहरणं वैसर्जनहोमीयं वा
सोऽध्वर्युर्गृह्णातीति तत्प्रमाणमप्रमाणं वेति विचारः कर्तृसामान्यात्प्रत्यक्षश्रुत्यविरोधात्प्रमाणमिति प्राप्ते उच्यते नदृ
ष्टहेतौ दृष्टे त्वंतरानुमानं प्रक्रमते दृष्टश्चात्र लोभ एव हेतुरिति तत एव स्मृत्युपपत्तेर्नात्यंतापरिदृष्टवैदिकवचनकल्प
नोपपत्तिः अतः श्रुतिविरुद्धं दृष्टकारणं च स्मरणमप्रमाणमतोऽन्यत्प्रमाणमिति यस्त्वाचार्यैरधिकरणांतंगोद
ब्रितिः तत्रायमभिप्रायः न वेदेवं स्मृतेर्बोधो यदि स्मृतिमूलं न कदाचिदपि कैश्चित्कस्यांचिदपि शाखायां यव्यते
इत्यध्यवसातुं शक्यते तदा हि तत्र सर्वपुरुषाणामेव प्रत्यक्षप्रमाणाभावा केवलं स्मृत्यनुमानसमधिगम्य

श्रुतिवाक्यमनुमानस्य प्रत्यक्षविरोधेनुदयात्सकलजनसमस्तप्रमाणयथानुवर्त्तिगगनकुसुमायमानं स्यात् नचै
वमध्यवसातुं शक्यं अनंतचरणशाखानामनेकसहस्राणां वेदशाखानां कार्त्स्न्येनोपलंभाभावात् एवं चानध्यवसीय
8 मानेसत्यपि विरोधे दुर्लभतरमप्रामाण्यं नित्यानुमेयश्रुतिमूलतानिराकरणात् यदा हि शाखांतरगतानि पुरु
षांतरप्रत्यक्षाण्येव वेदवाक्यानि स्मृतीनां मूलं तदावेष्टनवाक्यमपि स्मृत्या पुरुषांतरप्रत्यक्षतया संपद्यमाने क
थमिव शक्यं नास्तीति वदितुं द्वेधा हि तस्याभावावधारणं बाधकप्रमाणसद्भावात् साधकप्रमाणाभावाद्वा बाधक
सद्भावोपि द्वेधा दृश्यादर्शनाद्वा तदभावनियतार्थान्तरदर्शनाद्वा न तावत् दृश्यादर्शनं समस्तशाखोपलंभाभा
वादित्युक्तं नच विरुद्धश्रुतिदर्शनं तदभावनियतं येन तद्दर्शनात्तदभावोवधार्येत विरुद्धानामपि ग्रहणाऽग्रहण

दिश्रुतीनांसहस्रमुपलंभतीतिनतावद्बाधसद्भावःनापिसाधकाभावःसखल्वात्मीयःसर्वेषांवाभवेत्नतावत्स्वप्रमा
णनिहत्यावस्थाभावनिश्चयोतिप्रसंगात्नचसमस्तपुरुषाणामत्रप्रमाणंनास्तीतिशक्यतेनिश्चेतुंसंभवतिहितस्या
शाखांतरेसमाम्नानंपुरुषांतरेणचप्रत्यक्षीकरणंनित्यानुमेयत्वेहिसर्वेषामिहानुमानमेवप्रमाणंस्यात्तच्चप्र
त्यक्षश्रुतिविरोधेनोदेतीतिसर्वपुरुषाणामत्रसाधकाभावादीषत्करमभावावधारणंस्यात्नचतद्वदस्तीत्युक्तेरं
धपरंपरादोषात्अतःपुरुषांतराणामिहप्रत्यक्षसंभवात्तस्यचात्मप्रत्यक्षतुल्यत्वात्तस्मात्तच्छ्रुतिनिराकरणंतदु
क्तमात्मीयात्परकीयस्यदौर्बल्यंनहिकिंचनप्रत्यक्षत्वाविशेषेणस्वप्रत्यक्षसमंहितत्यदाचैवंस्वशाखापठित
श्रुतितुल्यप्रमाणकात्तयास्मार्तमपिवेदवाक्यंसंभाव्यतेतदास्मृतिलिंगकमनुमानंनकेनचित्प्रतिबध्यतइ

त्तिननिर्मूलत्वंस्मृतेःशक्यतेवक्तुंततश्चवेदनस्यार्नयोरात्मीयपरकीयप्रत्यक्षश्रुतिविहितयोस्तुल्यैकद्वयप्रमाण
तयाविकल्पोन्याय्यःयदिपरमात्मीयस्यप्रत्यक्षस्यविश्रंभनलीयतयातेनैवपरप्रत्ययमरादत्यव्यवहारःक्रियतेततः
क्रियतांअनादरणंचसहस्रतमेप्यंशेपरप्रत्ययस्यादृष्टमूलस्यन्यायाभासनिमित्तत्वसंभवात्त्वांत्यादिमूलत्व
संभवाच्चअंशंवासमन्निव्याहारादितिवत्नत्वप्रामाण्याध्यवसानंव्यवहारविशेषौचित्यप्रतिपादनार्थंचेदंस्व
त्वंविरोधेत्वनपेक्षस्यादितिश्रुतिस्मृतिविरोधेयत्प्रमाणांतरानपेक्षंश्रुतिवाक्यंतदेवग्राह्यंअसतिह्यात्मप्रत्य
येपरप्रत्ययानुमानक्लेशेनाश्रयणंनिमित्तंयथाहुःयावदेकंश्रुतौकर्मस्मृतौचान्यत्रनीयतेतावत्तयो
र्विरुद्धत्वेश्रौतानुष्ठानमिष्यतइतितेनफलतोप्रामाण्यंश्रुतिविरुद्धानांस्मृतीनामितिस्थितंनाध्यमध्यननु

१

ष्टानालनप्रामाण्यपरंव्याख्येयंयद्वायान्येतानित्रयीवह्निर्नपरिग्रहीतानिशाक्यादिनिमित्तानिधर्मग्रन्थाभासानितेषाम
नेनाप्रामाण्यं पूर्वसूत्रोक्तकर्तृसामान्यप्रत्युदाहरणत्वेनोच्यते तेषां हि प्रत्यक्षादिमूलत्वेनप्रामाण्यंप्रत्यक्षसूत्रेनिराकृते
मन्वादिवद्वेदमूलत्वेनप्रामाण्यमिहनिराक्रियते तेषां ह्यसत्यपिप्रसिद्धवैदिकैरग्निहोत्रादिभिः कर्तृसामान्येभिन्नप्रस्थाना
वेदामूलंनभविष्यंतियथैवाथर्वणस्यत्रयीभिन्नरूपतयाभिन्नप्रस्थाननतातथाचतुर्भ्योवेदेभ्योभिन्नरूपावेदाःसंभवेयुः ते
चेदानींप्रलीनाःमन्वादीनामपिहिकेचित्प्रलीनशाखामूलतामनुमन्यंतेतद्वदत्रापिभविष्यतिइष्टंचसंभवतिप्रामाण्येना
प्रामाण्यंयुक्तमितिभवतिकेषांचिदाकूतंसाचमंदविषन्यायेननिराकर्तव्येत्येवमर्थमिदमधिकरणं कृतपूर्वपक्षःसिद्धां
तस्तुत्रयविच्छिन्नवैदिकपरिग्रहानुपपत्यामन्वादिष्वनुपलभ्यमानोपिवेदःकल्पितःशाक्यादिष्वस्यांविपरीतमवैदि

कमप्रमाणंचतदित्येवमेवशिष्टानांस्मरणंवेदविद्वेषेणएवंतेषामप्रामाण्यंमन्वंतेदृष्टानुसारिणीचकल्पनानचतद्वैप
10 रीत्येनातोऽत्रवेदकल्पनादवीयसीत्यप्रामाण्यमेवतेषामसन्मूलत्वादिति शिष्टाकोपेऽविरुद्धमितिचेन्नशास्त्र
परिमाणत्वात् आचांतेनकर्मकर्त्तव्यंयज्ञोपवीतिनाकर्त्तव्यंदक्षिणाचारेणकर्त्तव्यमित्येवमादीनिक्रत्वर्थांगस्म
रणान्युदाहरणंकिंप्रमाणमप्रमाणंवेतिविचारःतदर्थंप्रत्यक्षश्रुत्यादिभिर्विरुध्यंतेनवेतितदर्थमप्येभिःक्रतुमध्येनु
ष्ठीयमानैःकस्यचित्श्रुत्यर्थस्यकर्मादिबाधोभवतिनवेतिअथवाभ्युपेत्यैवविरोधंप्रमाणमप्रमाणंवेतिविचारःतद
र्थंचप्रमाणप्रमेयबलाबलविसंवादेकोन्यायइतिचिंत्यतेतथाहिश्रुतिस्मृत्योःप्रमाणयोःश्रुतिर्बलीयसीतिस्थितं
अतःश्रौतत्वात्क्रमादयोबलीयांसःस्मार्तेभ्यआचमनादिभ्योविज्ञायंतेप्रमेयस्वरूपालोचनेतुपदार्थगुणत्वा

त्क्रमादेराचमनादयः पदार्थाबलीयांसोवगम्यते बलाबलद्वयविसंवादात्कतरेण निर्णय इति संदेहः तत्र पूर्वः पक्षः श्रुत्यु
क्तानां क्रमादीनां स्मार्त्तैराचमनादिभिः व्याकोपः स्यादतस्तावद्विस्पष्टैव विरोधिता ततः श्रुतिबलीयस्त्वात्स्मार्तं स्यादप्र
माणता पूर्वस्याविप्रमाणस्कंधप्रमेयस्कात् बलाबलात् ज्यायस्तेनैव निर्णीतेन पश्चादितरादृतः नैराकांक्ष्यात्स्वमाण्यमतः
स्मृत्यर्थबाधनं ३ वेदं कृत्वा वेदिं कुर्यादिति क्रमः कालश्चायः प्रधानेनांगानामविप्रकर्षः प्रयोगप्राशुभावश्च प्रयोगव
चनावगतो यश्च पूर्वोक्तादिः परिमाणं चाविस्मृतसमस्तपदार्थानुष्ठानसिध्यर्थं प्रयोगविधिनैवाकांक्षितं पदार्थविधिप्रव
यावगतं तत् त्रितयमपि क्रमकालपरिमाणात्मकमाचमनादिभिरन्यथात्वं प्रतिपद्यते तेन विरोधस्तावदस्त्येव विरो
धे च श्रुतिबलीयस्त्वात् स्मृत्यर्थस्याचमनादेर्बाधः न च श्रुत्यर्थस्यापि पदार्थगुणत्वात् क्रमादेर्दौर्बल्यमाचमनादेस्तु

स्मृत्यर्थस्यापि तदर्थत्वात् बलीयस्त्वमिति वाच्यं प्रमाणपूर्वको हि प्रमेयावगमस्तेन पूर्वं नाविप्रमाणस्थं बलाबलं पू
र्वमवगम्यते तेन वाचमनादिभ्यः क्रमादीनां बलीयस्त्वे निर्णीते निराकांक्षत्वान्न पश्चादवगतं प्रमेयबलाबलमाद
र्तव्यं तस्मादाचमनादिस्मृतीनामप्रमाण्यं सिद्धांतस्तु पदार्थप्राप्तिहेतुत्वात् क्रमादेरविरोधिता विरोधेपि च दौ
र्बल्यं पदार्थेभ्यो गुणत्वतः १ सर्वेषु हि पदार्थेषु प्राप्तेषु प्रयोगवेलायां तद्विशेषणतया क्रमस्याश्रीयते तेन पदार्थ
प्रा[illegible]ये हेतुत्वात् क्रमस्यात्यंतजघन्यप्रमाणकोपि पदार्थः पूर्वं प्राप्नोति पश्चात् क्रमः पूर्वपदार्थप्रयोगांगतया व
तरन्नपि न पदार्थैर्विरुध्यते कालोप्येवमेव प्रयोगांगत्वात् यावंतः पदार्था अवधारितास्तेषां सर्वेषामेव पूर्वाह्णा
दिकालत्वं प्रधानसन्निकर्षः प्रयोगप्राशुभावश्च परिमाणं तु न कस्यचित् पदार्थप्राप्तिहेतुत्वादविरोधित्वं

यद्यपिकमादीनामाचमनादिभिर्विरोधस्तथापिसर्वपदार्थगुणत्वादौर्बल्यंत्राचमनादयस्तुपदार्थत्वात्बलवं
तःनचप्रमाणबलाबलस्यपूर्वनावित्वंनहिप्रमाणयोःस्वरूपतोविरोधःअपितुप्रमेयविरोधनिमित्तःप्रमेय
गतंहिविरोधमालोच्यप्रमाणविरोधबुद्धिर्भवतितदादैवप्रमेययोर्विरोधोगम्यतेततदैवतयोर्बलाबलमपीतितत्त्व
वनिर्णयेजातेनैराकांक्ष्यात्प्रमाणबलमनादर्त्तव्यमितिनस्मृतेर्बाधःयद्धिस्वतएवाप्रमाणंशाक्यादिवाक्यंतत्सर्व
दैवानादर्त्तव्यंयत्तुबलवद्विरोधापेक्षमप्रमाणंतत्तज्ज्ञानापेक्षयाप्रमाणमेवेत्यवगंतव्यंनचात्रबाधकमस्तिप्रमा
णबलाबलस्याबाधकत्वात्तस्मादाचमनादेर्बलीयस्त्वात्तदनुरोधेनैवश्रुत्युक्तक्रमादयोबाध्यन्तइत्याचमनादि
स्मृतीनामबाधात्प्रामाण्यमितिनत्विदमेवमधिकरणंपूर्वपक्षस्यातिमंदत्वाद्यज्ञोपवीतादेश्चप्रत्यक्षश्रुतिविहित

त्वेनानुदाहरणत्वात् तस्माद्यत्पूर्वं शाक्यादिशास्त्राभासानामप्रामाण्यमुक्तं तत्रैव चोद्योत्तरत्वेनाद्यसूत्रद्वयं व्याख्येयं यत्तु
तेष्वहिंसादिवचनं श्रुतिस्मृत्यविरोधि न कोपयति तत्प्रामाण्यं न व्यवतिष्ठते तत्त्वोत्तरं न शास्त्रपरिमाणत्वादिति न खलु ये
न केनचित् प्रमितो धर्मः फलं साधयति स्वाध्यायोऽध्येतव्यो वेदोऽखिलो धर्ममूलं तद्विदां च स्मृतिशीले धर्मज्ञसमयः
प्रमाणं वेदाश्च पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश इत्येवमादि
भिर्वेदादिभिरेव धर्मप्रमितेर्नियमादन्यतः प्रमितस्य फलसाधनत्वाभावेन धर्मत्वाभावान्न तेषामप्रामाण्यमिति
यत्तु तृतीयं सूत्रं अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् तेषु दर्शनाद्विरोधस्येति तत्सदाचारप्रामाण्यं प्र
तिपादनार्थमधिकरणान्तरं व्याख्येयं अत्रानिबन्धनाः सदाचाराः वसन्तोत्सवादय उदाहरणं प्रमाणमप्रमाणमि

निसंदेहः तदर्थंच श्रुतिमूलत्वं चात्यादिमूलत्वंवेतिचिंतनीयंतत्रस्मृत्यधिकरणेकर्तृसामान्यादाचाराणामपिस्मृ
तिवत्प्रतिपादितमपिप्रामाण्यंनिर्निबंधनतयाव्यतिक्रमसाहसदर्शनाच्चाक्षिप्यसमाधीयते यदिवसंतोत्सवा
दयोष्टकादिवद्वेदमूलाभवेयुस्ततस्तद्वदेवमन्वादिभिरपिनिबध्येरन्ननिबंधनात्तुनैषांमूलंकेनचित्तद्दृष्टं
आचारपरंपरामेवदृष्ट्वामन्वादिभिरपिसदाचारःप्रमाणमित्येवंपरोक्तरूपेणाभिधानात्प्रामाण्यमनुमी
यतइतिमन्यामहे तत्रसैवांधपरंपरास्यात् धर्मव्यतिक्रमसाहसदर्शनाच्च नाचारमात्रात्कथंधर्मत्वाध्यवसान
मितिपूर्वःपक्षःसिद्धांतस्तुधर्मबुद्ध्यावैदिकैरनुष्ठानमसतिवैदिकत्वेनुपपन्नंव्यतिक्रमसाहसदर्शनंतुरागद्वेषा
दिनिबंधनत्वान्नधर्मबुद्धिनिबंधनंधर्मबुद्धिनिबंधनस्यचाचरितस्याग्रह्यमाणकारणत्वात् श्रुतिस्मृतिविरोधा

दर्शनाच्च धर्मलिंगत्वाव्यभिचारः मन्वादिभिस्तुल्याघविवेके यदि नाम स्वरूपेण निबध्य सामान्यात्मना शिष्टाचारः
13 प्रमाणमित्युक्तं नैतावता कश्चिद्विरोधः तस्मात्स्मृतिवदाचाराणामपि धर्मे प्रामाण्ये सिद्धे तेषु दर्शनाद्विरो
धस्य समा विप्रतिपत्तिः स्यात् आचारप्रसंगात् शब्दार्थप्रयोगरूपाचारविप्रतिपत्तौ बलाबलं चिंत्यते अत्र
भाष्ये आर्यम्लेच्छविशेषानुपादानात् वाक्यशेषेण च सिद्धांतकथनाच्छिष्टाचारस्य पूर्वप्रकृतत्वात् यत्र शि
ष्टानामेव मिथोभिधानविप्रतिपत्तिः केषांचिद्वाक्यशेषानुगुणं केषांचिदननुगुणं तत्र तुल्यबलतामाशं
क्य वाक्यशेषानुगुणार्थाबलीयस्त्वं प्रतिपाद्यमिति तन्नोदाहरणाभावात् यवादिशब्दानां दीर्घशूकादिष्वेव
सर्वशिष्टप्रयोगविप्रतिपत्तिविषयस्योदाहरणस्यादर्शनाच्च संदिग्धे तु वाक्यशेषादित्यनेन गतप्राय

त्वाद्वाक्यशेषाच्चेन्निर्णयस्ततोऽसति वाक्यशेषेऽनियुक्तानभियुक्तप्रसिद्ध्योः तुल्यबलत्वप्रसंगादयुक्तमिति मत्वाचा
र्येरन्यथाधिकरणं व्याख्यातं यथार्यम्लेच्छयोरभिधानविप्रतिपत्तिः यथा पीलुशब्दमार्या वृक्षविशेषे प्रयुंजते म्लेच्छास्तु ह
स्तिनि तत्र चिंत्यते किं तुल्यबलत्वमुतार्यप्रसिद्धेर्बलीयसीति तत्र लोकप्रसिद्धिगम्यत्वाच्छब्दार्थस्योभयोरपि समावि
प्रतिपत्तिः स्याच्छास्त्रार्थे हि बलाबलं यः शास्त्रप्रमाणकोऽधर्मस्तत्र शास्त्राभियोगशून्येभ्यो म्लेच्छेभ्यः तदभियोगशालि
नामार्याणामस्ति बलीयस्त्वं व्यवहारगम्यस्तु शब्दार्थः स तु म्लेच्छानामप्यविशिष्ट इति प्रमाणविशेषादविशिष्टेद्व
योरपि शब्दार्थः यच्चार्येष्वनादित्वकारणमवध्यस्मरणं तदपि समानं म्लेच्छेष्वपि तस्मात्समेयमभिधानविप्रतिपत्तिः
स्यादिति प्राप्ते ब्रूमः प्रतिपादकतामात्रं म्लेच्छेष्वप्यवगम्यते अविप्लुतस्तु शब्दार्थः शिष्टेष्वेवावधार्यते न तावदेवं न्या

यमुभावपि शब्दार्थावित्यनेकदृष्टशक्तिकल्पनाप्रसंगात्तत्र शब्दप्रयोगेपि चान्यतरस्याप्यनवधारणाद्व्यवहारानु
पपत्तिः प्रसंगात्कदाचित्कस्यचिदुपादाने इष्टविधेरिष्टविकल्पापत्तेरेकत्र मुख्यत्वेन्यत्र गौणत्वेनापि प्रयो
गोपपत्ते गौणप्रयोगे पार्श्वस्थानां मुख्याभिमानसंभवेरेव चान्येस्यो मुख्यत्वकथनान्मुख्याभिमानपरंपरा
नुवृत्तिसंभवात्तत्र यदि न कथंचिदपि विशेषोवधार्येत तदा गत्यभावात् द्वयोरप्यभिधेयता स्यात् अस्ति
त्वनियुक्तानियुक्तयोर्विशेषः शास्त्रस्थादिशब्दैकसमधिगम्यधर्माधर्माविप्लुतिलिप्सयात्र शब्दार्थतत्त्वं वि
विच्य परिपालयंति म्लेच्छास्तु दृष्टार्थव्यवहारस्य यथाकथंचित्सिद्धेः प्रयोजनाभावान्नाविप्लुतिसिद्धौ
यतंते ऽतो यद्यपि प्रतिपादकतामात्रं म्लेच्छेष्वपि साध्यति तथापि विप्लुतिसंभवान्नेतेषु शब्दार्थतत्त्वसिद्धिरि

तिष्ठार्यप्रसिद्ध्यैवनिर्देशपियावलीयस्यार्थसिद्धिरितिपील्वादिन्यायाद्वाक्याद्यनिधायिनइतिस्थितंभाष्यमप्यार्यम्लेच्छविना
गान्निश्चयमेवव्याख्येयंवाक्यशेषश्चान्युच्चयत्वेनोक्तोनमूलहेतुतयेतिस्मृत्याचारविरोधेवायत्रमन्वादिनिर्वंधनानांस्मृ
तीनामनिवंधानांचाचाराणांविरोधोमातुलदुहितृपरिणयनादिषुतत्रचिंताकिंतुल्यकक्षत्वमुतस्मृती वली
यस्त्वमितितत्रवलावलविशेषस्तुकस्यातरितकारितःश्रुतिस्मृत्योरिहत्वेवंनद्वयोःश्रुतिमूलत्वःश्रुत्याहिसाक्षादर्थःप्र
तीयतेस्मृत्यानुश्रुतिकल्पनयेत्येकांतरितप्रामाण्यादव्यवहितप्रामाण्यश्रुतिर्वलीयसीतितत्रयुक्तंयत्स्मृतेरन
नुष्ठानलक्षणमप्रामाण्यमिदंत्वेवंविशेषोनास्तिद्वयोरपिश्रुतिमूलत्वेनैकांतरितयोरविशेषात्तस्मात्समाविप्र
तिपत्तिरितिअत्रोच्यतेसप्रत्ययप्रणीताहिस्मृतिःसोयंनिवंधनातस्यास्तेनवलीयस्त्वमाचाराणांनिर्निवंधनात् २

प्रत्यपितत्तराद्धिमत्त्वादियः स्मरतरिस्तत्स्मरणं गुणवत्तरकर्तृकत्वादितरजनचरित्राद्विश्रंभनणीयतरमिति व्यक्तमेतत्
अपि वाचरितृत्वेनं जनीनीस्वयमितस्ततो विप्रकीर्णप्रकरणादिगतश्रुत्युद्धरणेनार्थे प्रतिपत्तुमसामर्थ्यादेवत्रयमेतेम
15 हर्षिभिर्निरवद्यास्वस्मत्वासमर्पितमर्थमनुतिष्ठंतीत्यंगीकार्यमत आचारस्य स्मृतिकल्पनेन श्रुतिकल्पकत्वमिति द्वयं
तरितप्रामाण्यात्दुर्बलत्वं अपि चाचारेषु स्वरूपमात्रमेव प्रत्यक्षं कर्तव्यता तु विमर्शपूर्वमर्थसुखादिहेत्वंतरासंभवति
रूपेणेन पारिशेष्यात्कल्पयितव्या तां च कल्पयित्वा पश्चान्मूलकल्पनमिति विप्रकर्षः स निबंधनासु तु स्मृतिषु द्वागे
वग्रंथतः कर्तव्यतावगम्यते मूलमात्रं तु कल्प्यमिति सन्निकर्षः सर्वेषां च स्मृतिविरुद्धानामाचाराणां मातुलदुहितृ
परिणयनादिविषयकाणां कामादिहेत्वंतरं विस्पष्टमेव दृश्यत इति न कथंचिदपि श्रुतिमूलत्वं संभावनीयं न चात्र

विकल्पास्तुपगमेनोभयोरपिप्रामाण्यंसंभवतिवस्तुनिविकल्पासंभवात् नहिमातुलदुहितृपरिणयनाव्यत्यवा
योत्पत्तिश्चभवतीत्यवश्यमन्यतरस्याप्रामाण्यमाश्रयणीयंतत्रगृह्यमाणनिमित्तस्याचारस्याप्रामाण्यमितिसि
द्धमेवंजातीयकानांदुराचारत्वं अथवाविरुद्धवर्ष्ववालादेःयत्रलौकिकवाक्यशेषयोरर्थविप्रतिपत्तिःयथात्रि
दृद्धहिष्पवमानमित्यत्रत्रिवृत्तस्त्रैगुण्यंलोकादर्थोगम्यतेवाक्यशेषात्तुस्तोत्रीयानवकं आदित्यःप्रायणीयः
पयसिचरुरितिचरुशब्दस्यस्थालीवाक्यशेषादोदनःआश्ववालःप्रस्तरइतिअश्वस्यवालाःवाक्यशेषात्तुका
शाःऐक्षवीविधृतीइतिइक्षवयवात्मिकेलोकाद्वाक्यशेषात्काशमूलेतत्रकिंलोकवाक्यशेषयोस्तुल्यवल
त्वमुतवाक्यशेषस्यप्रतिपत्तिर्वलीयसीतिसंशयःतत्रपदार्थपदसंबंधेतुल्यत्वंलोकवेदयोःअदृष्टसाधनत्वे

का हिल्लौंद्देशोतिरिच्यते १ विध्युद्देशात्तावदेतावद्ध्वगम्यते यदिह त्रिष्टदादिशब्दाभिधेयं तद्वाक्यार्थान्वयीतिकिं

तस्याभिधेयमित्यन्यातोवगंतव्यं तत्रलोकस्याप्यभिधेयनिर्णये वेदवाक्यशेषतुल्यत्वं ततोधिकं वासामर्थ्य

16 मस्तीत्यर्थद्वयमपितुल्यमानकत्वाद्विकल्पेनगृहीतव्यमिति पूर्वःपक्षः सिद्धांतस्तुवाक्यैकत्वंविधिस्तुत्यो

र्विषये क्याहते नहि तेनात्रवाक्यशेषस्थाप्रतिपत्तिर्बलीयसी १ यादिलौकिकोर्थोविध्युद्देशेनाश्रीयते न्या

र्थश्च विध्युद्देशाइति नकथंचन संबंधः स्यात्तस्माद्यत्रवाक्यशेषः त्रिवृद्बहिष्पवमानमित्यादिषु तत्रतावत्त

दनुगुणएवार्थः समाश्रयणीय इत्येतावदिहाधिकरणेस्थितं यदाचैवं वाक्यशेषवशात्स्तोत्रीयानवकम

पिवाच्यमिति स्थितं तदायत्रवाक्यशेषोनास्ति त्रिवृदग्निष्टुदग्निष्टोमइत्यादिषु तत्राप्यनेनैवार्थेनभवित

व्यं रूढिवशादिति दर्शमेव वक्ष्यते चरुशब्दोप्योदनस्थाल्योः परस्परसंबंधाद्वाक्यशेषावधारितौदनवचनत्वेन स्था ।
ल्यामन्याय्यश्चानेकार्थत्वमिति प्रतिबद्धशक्तित्वात् लाक्षणिकस्तेनासत्यपि वाक्यशेषे सौर्यं चरुं निर्वपेदित्यादावोद
नवचनत्वमेवेति दर्शमेव वक्ष्यते आश्ववालैर्हवीशब्दोपि काशतन्मूलयो रूढत्वादन्यत्रापि तदर्थवेव नवतः न
चात्र संदिग्धेषु वाक्यशेषादित्यनेन गतत्वमसंदेहात् दृढं हि वाक्यशेषात् प्रागेवार्थान्तरमेव निर्णीतं वाक्यशेषेण
तु बाध्यते न तु प्रथमं संदिग्धं तेन निर्णीयत इति चोदितं तु न प्रतीयेत आविरोधात् प्रमाणेन   आर्यप्रसिद्धिविरोधे
म्लेच्छानां प्रसिद्धेरप्रामाण्यमुक्तमिदानीं किं म्लेच्छप्रसिद्धिरित्येवाप्रामाण्यमुत बलवद्विरोधादेवाप्रमाणमवि
रोधे तु भवत्येव तस्यास्तत्र प्रमाणत्वे विधेयनिर्णये प्रामाण्यमिति चिंत्यते पिकनेमसततामरसादिशब्दः न कश्चिदा

मीमांसा प्रमानक

६४.

